अङ्क-२६
जुलाई-दिसम्बर २०१५

वेदविद्या
ISSN-2230-8962

यत्र विश्वं भवत्येकनीडम्

डॉ. राममूर्ति चतुर्वेदी

साम्प्रतं शैक्षिक समाजेषु वाणिज्यप्रतिष्ठानेषु च भूमण्डलीकरणं वैश्वीकरणं वा समधिकं चर्चीयते। आधुनिक सञ्चार माध्यमान्तं वैपुल्येन गमनागमनसाधनानां सौकर्य्येण च समग्रं विश्व नितरां नेदिष्ठमिव प्रतिभाति, परन्तु भौतिकमिदं नेदिष्ठं यति स्वकीय सुखसाधन संवर्धनार्थमेव, भवति, तर्हि न लोककल्याणाय विश्वहिताय च कल्पिष्यते, यदि वा आध्यात्मिकं नेदिष्ठं जायते, तर्हि सुतरामेव सर्वप्राणिनां कृते श्रेयस्करं विश्वस्मै शुभावहं च भविष्यति।

"वेदानां विश्वस्मै किं योगदानम्" इति जिज्ञासायां "यत्र विश्वं भवत्येकनीडम्" इति श्रुति वचनं स्वनिहिततात्पर्यनिरुपण पुरस्सरं सुतरां सप्रमाणं व्याख्येयतामर्हति। अस्यामेव वेदविहित वैश्विकभावभूमौ "वसुधैव कुटुम्बकम्", "स्वदेशो भुवनत्रयम्", "सा संस्कृतिः प्रथमा विश्ववारा" "कृष्वतो विश्वमार्यम्" इत्यादीनि श्रुति स्मृति वचनानि सुतरां संगच्छन्ते।

"कुत्र विश्वं भवत्येकनीडम्" इति जिज्ञासायाः समाधाना र्धमेव प्रथमतः वैदिकं बहुदेवतावादं निरुप्य तत्र सर्वेषां देवानां परमात्मन्येनान्तर्भावं प्रतिपाद्य तत्रैव विश्वं भवत्येकनीड मिति सप्रमाणं वक्तुं शक्यते ।

मन्त्रवर्णसन्दर्भः – "यत्र विश्वं भवत्येकनीडम्" इत्ययं मन्त्रवर्णः शुक्ल यजुर्वेदीय माध्यान्दिन संहितायां द्वात्रिंशाध्यायस्याष्टतमे मन्त्रे समाम्नातः।

तत्र प्रसक्तः सम्पूर्णोऽयं मन्त्र –

वेनस्तत्पश्यन्निहितं गुहा सत् यत्र विश्वं भवत्येकनीडम्।
तस्मिन्निदं सच्च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु ॥[१]

अत्र भाष्यकारो महीधराचार्यः 'तत्' पदेन वेदान्तप्रसिद्धं ब्रह्म गृह्णति, 'तत्' पदं वस्तुतः सर्वनाम पदमस्ति, अतः पूर्वपरामर्शकं बुद्धिस्थ परामर्शकं वा भवति। भाष्यानुसारं वेनः पण्डितः विदित वेदान्त रहस्यः तत् बुद्धिपरामृष्टं परं ब्रह्म पश्यति जानातीत्यर्थः। कीदृशं तत् सत् – नित्यं गुहायां निहितं- दुर्ज्ञेयमित्यर्थः, यत्र ब्रह्मणि समग्रं विश्वमिदं ह्येकनीडमिव भवति, एकमेव नीडमाश्रयो यस्य तत् अविभक्तंमविशेषं कारणमेव भवतीत्यर्थः ।

---

[१] शुक्ल यजुर्वेद ३२/८

सर्वमिदं विश्वं भूतजातं सर्वकाले तस्मादेव ब्रह्मणः निर्गच्छति तथा संहारकाले पुनः तस्मिन्नेव ब्रह्मणि प्रक्लीयते। स एवं परमात्माविश्वेषां प्रजानां सर्वविधप्राणिनां हृदयाकाशे प्रतिष्ठित त्वात् तन्तुषु पट इव ओतः प्रोतश्च विद्यते । स एव कार्यकारण् रूपेणविविधभूतत्वात् विंभुरित्युच्यते ।

पुनरयं मन्त्रवर्णः अथर्ववेदीय शौनकशाखाया द्वितीयेकाण्डे प्रथम मन्त्रे स्वल्पान्तरेण प्राथते, तत्र, सम्पूर्णो मन्त्र एवं समान्नातः। वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येक रूपम् ।

इदं पृश्निरदुहज्जायमान्ताः स्वर्विदो अभ्यनूषत व्राः।[1]

अत्र भाष्यकारः सायणाचार्योऽपि तत् पदेन श्रुत्यन्तर प्रसिद्धं सत्यज्ञानादिलक्षणं परमं ब्रह्म गृह्णाति, तदनुसारं वेनः देदीप्यमान आदित्यः, गुहायां सर्वप्राणिनां हृदये तत् सत्यज्ञाना दि लक्षणं परं ब्रह्म पश्यति, यत्र सर्वाधिष्ठानरुपे पर ब्रह्मणिविश्वमिदं कृत्स्नं जगत् एकरूपतामधिगच्छति, आधेयरुपस्यविश्वस्य अधिष्ठानव्यतिरेकेण सत्त्वाभावात् । आदित्यो देवः स्वानन्यत्वेन आत्मसाक्षात्कृतवान् इत्यर्थः ।

वेदस्यपरमं प्रतिपाद्यम् – समासतो मुख्यतश्च वेदानां द्वे प्रतिपाद्ये वर्तेते, तत्र प्रथमं धर्मः, द्वितीयं ब्रह्म इति, इदमेव ब्रह्म सत्य ज्ञानादिलक्षणं वेदस्य परमं प्रतिपाद्यं विद्यते, भारतीय षड्दर्शनेषु केवलं धर्मस्य ब्रह्मणश्च जिज्ञासा कृता दृश्यते, तत्र जिज्ञासया क्रियमाणं धर्म ब्रह्मणोः विचारवैभव मीमांसा पदेन व्यवह्रियते, अतः पूर्व मीमांसायां धर्मजिज्ञास्यते, उत्तर मीमांसायां ब्रह्म जिज्ञास्यते, तत्र पूर्व मीमांसायाः प्रथमं प्रतिज्ञासूत्रं "अथातोधर्मजिज्ञासा" इति, तथा उत्तर मीमांसायाः प्रथमं प्रतिज्ञां सूत्रं "अथातो ब्रह्म जिज्ञासा" इति। इतरेषां भारतीय दर्शनानां प्रतिज्ञावाक्येषु न तावद् जिज्ञास्यं किमप्युपलभ्यते, निदर्शनार्थमत्र तेषां प्रतिज्ञावाक्यं द्रष्टुं शक्यते, तद्यथा –

सांख्य दर्शने प्रथमं प्रतिज्ञासूत्रम् – "**अथ त्रिविध दुःखात्यन्त निवृत्तिरत्यन्त पुरुषार्थः।**"[2]

योग दर्शने प्रथमं प्रतिज्ञासूत्रम् - "**अथ योगानुशासनम्**" **इति।**[3]

न्यायदर्शने प्रथमं प्रतिज्ञासूत्रम् - "**प्रमाणप्रमेय संशय प्रयोजन दृष्टान्तसिद्धान्तावयवतर्क निर्णय वादजल्प वितण्डाहेत्वाभासच्छल जाति निग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः।**"[4]

वैशेषिक दर्शने प्रथमं प्रतिज्ञासुत्रम – "**अथातो धर्मं व्याख्यास्यामः**"[5]

उमे पूर्वोत्तरमीमांसे भारतीय दर्शनेषु मीमांसादर्शनं वेदान्तदर्शनश्चामिधानेन व्यह्रियेते, तत्रेदमवगन्तव्यं यत् पूर्वमीमांसा दर्शनेन धर्मतत्त्वमवोध्यते, तथोत्तर मीमांसा दर्शनेन अर्थात्

[1] अथर्व २.१
[2] सां. सू. १.१
[3] यो. सू. १.१
[4] न्या.सू. १.१.१.
[5] वै.सू.१.१.

वेदान्तशास्त्रेण ब्रह्मतत्त्वमवबोध्यते। तत्त्व जिज्ञासायां प्रथमं धर्मतत्त्वं साधनत्वेन जिज्ञास्यं जायत इति वैदिकसिद्धान्तानुरुपः क्रमः ।

धर्मस्वरूपनिरूपणम् – विश्वस्मिन् विश्वे सर्वविध धर्मस्य मूलस्रोतांसि वेदा एव वर्तन्ते, यतो हि वैश्विकवाङ्मये ऋग्वेदादि चतुर्वेदा एव ग्रन्थप्राथमिकत्वेन परिगण्यन्ते, तत्र सर्वाधिकः पुरातन प्राचीनश्च ग्रन्थः ऋग्वेदोऽस्तीत्यत्र नास्ति मनागपि संशीति लेशः। अत एवोच्यते –

चातुर्वर्ण्यं त्रयोलोकाः चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्धयति ॥ मनु
"वेदोऽखिक्तोधर्ममूलम्"[१]
धर्मो विश्वस्य जयतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पति,
धर्मेण पापमनुदति, धर्मे सर्वं प्रतिष्ठितं, तस्माद् धर्मं परमं वदन्ति ॥[२]
यः कश्चित् कस्याचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहतो वेदे सर्वज्ञान मयो हि सः ॥[३]

पूर्वमीमांसाया प्राथमिक ग्रन्थे अर्थसङ्ग्रहे धर्ममधिकृत्य "अथ को धर्मः किं तस्य लक्षणम्" ? इति प्रपूनमुपस्थाप्य समाधानं प्रस्तूयते, "यगादिरेव धर्मः, तल्लक्षणञ्च वेदप्रतिपाद्यप्रयोजनवदर्थो धर्म" इति ।

याग शब्दो हि यज्ञस्य नामान्तरं विद्यते, शाब्दिक निर्वचन दृष्ट्या –

"देवपूजा सङ्गतिकरण दानेषु" इत्यर्थकात् "यज् द्यातोः" "यज याज रक्षोनङ्" (पा० ३.३.९०) इति सूत्रेण नङ् प्रत्यये कृते 'यज्ञ' शब्दो निष्पद्यते। एतावता अयंभावो ज्ञायते, यद् यज्ञो नाम देवानामर्चनम्, देनैः सहसंगतिकरणम्, देवेम्यः पितृभ्यश्च तदीयं हव्यकव्यादिकं स्वाहा-स्वधावषट् कारादिना सम्प्रदानमिति।

सन्दर्भेऽस्मिन् श्रौत सूत्रकारेण महर्षिणा कात्यायनेन – **"अथ यज्ञं व्याख्यास्यामः"** इति प्रतिज्ञाय **"द्रव्यं देवता त्यागः"** इत्यादिनासूत्रेण समासेन यागस्वरूपं निर्दिष्टम् ।तदनुसारं अग्न्यादिदेवतोद्देश्येन आज्यपुरोडाशादि हविर्द्रव्याणामग्नौ प्रक्षेपरुपः त्यागः भागः कथ्यते । विष्णुदेवतावाचकम् । अतो देवाः सर्वतः प्रथमं ईशावास्यमिदं सर्वम् यत्किञ्च जन्मत्यां जगत्" इति श्रुत्या विष्णुमयेन पदार्थवता यागेन व्यापकं तमादिदेवं विष्णुमर्चयामासुः। यज्ञकर्मणि देवतायाः, दव्यस्य त्यागक्रियाश्च यत्त्रितयं स्वरुपं निगद्यते, तत्सर्वं प्राथमिकरूपेण विष्णु देवमयमेवासीदिति स्मृत्या प्रमाणियते, तद्यथा गीतायां भगवता कृष्णेनात्मानमेवाधिकृत्योच्यति ।

---

[१] मनु २.६
[२] तै. आरण्यक १०.६३
[३] मनु २.७

अहं क्रतुरहं यज्ञ स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यंमहमाग्निरहं हुतम् ॥
पिताहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्र मोङ्कारम् ऋक् साम यजुरेव च ॥[१]

धर्मब्रह्मणोः साध्यसाधनभावः – 'धर्मब्रह्मणि वेदैकवेद्ये' इति सायण भाष्योक्तेः धर्मः ब्रह्म च क्रमेण वेदेषु प्रतिपादनीये भवतः। तत्र धर्मपदेन व्यपदिष्टो यज्ञः साधनतामुपगच्छति ब्रह्म पदेन व्यपदिष्टो व्यापको देव विष्णुः साध्यतामुपगच्छति, अत एव धर्मःसाधनं ब्रह्म च साध्यमिति पौर्वापर्येण वक्तुं शक्यते। वेदेषु यज्ञ पदेन धर्मब्रह्मणोरुभयोरपि गृह्यमाणत्वात् तदर्थं यज्ञार्थमेव ऋग्यजुः सामलक्षणानां वेदानां प्राकट्यं समजनि । अतएव स्मृति पुराणोक्त वचनानि यज्ञार्थमेव वेदानामाविर्भावं प्रमाणयन्ति, तद्यथा –

अग्निवायु रविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञ सिद्ध्यर्थमृग्यजुः साम लक्षणम् ॥[२]
ऋचोय यजूंषि सामानि निर्ममे यज्ञसिद्धये ।[३]
वेदास्तु यज्ञार्थमभिप्रवृत्ताः ।[४]

यज्ञस्य प्रजानाञ्च सहैव सृष्टिः –

वेदेषु प्रतिपादिता यज्ञविद्या वस्तुतः जागतिकसृष्टि प्रपञ्चस्य मूलाधार शिला प्रकल्प्यते, भगवताव्यासेन भगवद्गीतायां तदेव स्मार्यते, यत् सृष्ट्यादौविधात्रा प्रजापतिना प्रजानां सर्जनावसरे ताभिः सह यज्ञ विधानमपि संसृज्य ताः प्रति प्रोक्तं, यत् अनेन याग कर्मणा यूयं देवान् प्रीणयत, प्रीणिताश्चदेवाः युष्मान् इष्ट प्रदानेनोपकुर्वन्तु। ततश्च प्रसन्नैर्देवगणै र्दत्तान् भोगान् प्रथमतस्तेभ्यः प्रदाय पश्चात् स्वयमेव भुञ्जीत, अन्यथा तैर्दत्तमन्नादिकं तेभ्योऽप्रदाय यदि कश्चित् भुंक्ते, तर्दि स ईश्वरानुज्ञारहितत्वात्चौर एव भवितुमर्हति। यतो हि "तत् सृष्ट्वातदेवानुप्राविशदिति" तैत्तिरीय श्रुत्या प्राणिनां तदीयजीवनाधायकान्नानाञ्च परमेश्वरनिर्मितत्वात् प्रथमतः भोग्यपदार्थानां परमेश्वरार्पणं शिष्टाचार सम्मतम्। अपिच सर्वविध प्राणिनां तदीय जीवनाधारस्य अन्नस्य सम्भवे परम्परया यज्ञ एव कारणं दरीदृश्यते । यथा हि अन्नेनैव प्राणिनः जीवन्ति, तत्र अन्नसम्भवे पर्जन्यः कारणं, पर्जन्योद्भवे यज्ञः कारणम्, यज्ञ सम्पादते वेदोक्तं कर्म कारणम्, वेदोक्तकर्मसम्पादने साक्षात् वेदः कारणम् वेदानां प्रादुर्भावे परमं ब्रह्म परमेश्वर कारणम्, एवं रीत्या परम्परया नित्यं सर्वगतं परं ब्रह्म यज्ञेप्रतिष्ठितं भवति।

यथोक्तं गीतायाम्– **सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**

---

[१] गी. ९.१६.१७
[२] मनु. १.२३
[३] ब्र.पु. १.४२
[४] वि. धर्मोत्तर पु. १.१०४

अनेन प्रसविष्यध्वमेष वोऽस्त्विष्ट कामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥
अन्नाद् भवन्ति भूतानि पर्जन्यादन्न सम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षर समुद्भवम्।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥[1]

देवमनुष्ययोः परस्पराश्रयत्वम् –

पौराणिक मान्यतानुसारं सृष्टि प्रपञ्चे परमेश्वरेणप्रत्येकं चेतन पदार्थस्य जडपदार्थै सह उपकार्योपकारकभावसम्बन्धः प्रतिष्ठापितः। तत्र सृष्टिकर्ता विधात्रा दिव्यशक्तिसम्पन्नान् देवान् संसृज्य तेभ्यो द्युक्तोकस्य दिव्यमनन्तञ्च सौख्य साम्राज्यं प्रदत्तं, ततश्च मानवांश्चोत्पाद्य तेभ्यो व्रीहियवादिहविद्रव्योत्पादयित्र्याः पृथिव्याः साम्राज्यं प्रदत्तम्, पुनश्च देव मनुष्ययोः पारस्परिकं सापेक्ष्यं भवेदिति हेतोः द्युलोकः पृथिवी लोकाधीनःपृथिवीलोकश्च द्युलोकाधीनः कृतः । द्युलोके वसन्तो देवा दिव्यानन्त सौख्य सम्पन्ना अपि आत्मजीवनाय मनुष्यलोकैर्विधिना दीयमानं हरिवन्नदिकञ्च सततं कामयन्ते, तथा च पृथिवी लोकस्था मानवा अपि स्वात्मजीवनाय- वानस्पत्यौषधमूतान्नरससम्पत्तये देवेभ्योऽन्नरसनिष्यादनक्षमां सुधामयीं जलवृष्टिं नितरामभिलषन्ति। अयमेव सङ्केतः शतपथब्राह्मणेऽपि प्राप्यते, यथा हि – **"इतः पदानाद्धि देवा उपजीवन्ति, यदन्नं होमान् जुहोति देवानेव तत्प्रीणाति"**[2]
अपिच मनुस्मृतावपि तथैवाशयो निर्दिष्टः, तद्यथा –

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥[3]

एवं प्रकारेण देवता मनुष्यश्चोभौ परस्पराश्रितौ – सन्तौ मिथो मनोऽभिलाषं पूरयतः। देवमनुष्ययो–रेतादृशो मैत्रीभावो लोकयोरुमयोः संवर्धनभावश्च 'यज्ञ' पदाभिधेयतामर्हति, पुनश्चायमेव वैदिककर्मानुष्ठानापरपर्यायो 'यज्ञः' धर्म पदेन व्यवदिश्यते ।

यज्ञेषु देवता बाहुल्यम् –

---

[1] श्रीमद्भगवत् गीता ३.१०.१५
[2] श.ब्रा. १२/२/१/१
[3] मनु. ३/७६

वेदप्रतिपादितेषु प्रकारबहुलेषु यज्ञेषु अग्नीन्द्र मित्र वरुणादयो विभिन्ना देवा पूज्यन्ते अर्च्यन्ते च। तत्र तत्तद्देवताप्रीति द्वारा स्वकीयाभिक्तषित कामना सांसिद्ध्यर्थं ऋत्विजः तत्तद्देवताभिद्यायकैर्मन्त्रैर्देवान् स्तुवन्ति । निरुक्तशास्त्रे यास्काचार्येण मन्त्रेषु दैवतमनुसन्धातुमुपदिश्यते, यत् "यत्काम ऋषिर्यस्यां देवतावामार्थपत्यमिच्छन् स्तुतिं प्रयुक्ते, तद्दैवतः स मन्त्रो भवति"[१]

वैदिक यज्ञेषु ऋग्मन्त्रैः साम मन्त्रैश्च वहूनां देवानां स्तवनं क्रियते, तत्र ऋग्वेदमन्त्रैः कृतं स्तवनं याज्ञिकपरिभाषायां 'शस्त्र' मुच्यते, तथासामवेदमन्त्रैः कृतं स्तवनं 'स्तोत्र' मुच्यते, तयोःलक्षणमपि प्राप्यते-यत् "अप्रगीतमत्रं साध्य गुणिनिष्ठगुणाभिधानं शस्त्रम्, तथा "प्रगीत मन्त्र साध्यगुणिनिष्ठगुणाभिधान स्तोत्रमिति।" "ऋच्यध्यूढंसामगीयते" इति परिभाषयापि ऋचामेव गानवैक्तक्षण्येन गेयरूपता जायते । इयमेव सामवेदीयास्तुतिः विशेषावृत्तिकरणात् 'विष्टुति' पदेनापि व्ययदिश्यते, पुनरियमेव विशेषा स्तुतिः विष्टुतिः विविधरूपतया 'स्तोम' पदेनापि व्यवहियते । तत्र गेयमन्त्राणां सङ्ख्याविशेषावृत्तिकरणात् त्रिष्टत्स्तोमः, पञ्चदश स्तोमः, एकविंशस्तोम इत्यादि स्तोमनामानि भवन्ति ।

एवं रीत्या वैदिक यज्ञेषु शस्त्र स्तोत्राभ्यां बहवः देवा संस्तूयन्ते, तत्र वेदेषु समाम्नाताः सन्ति प्रमुखा देवाः अग्निः, इन्द्रः, वरुणः, रुद्रः, विष्णुः, सविता, वायुः, सोमः, मित्रः, पूषा, उषा, धावापृथिवी, पर्जन्यः, मरुद्गणः, अश्विनौ, यम प्रमृत्यः । इतः परं वेदेषु न केवलं चेतना एव देवाः स्तुयन्ते, अपितु काष्ठ पाषाणाद्यचेतन पदार्थेष्वपि चेतनदेवतावत् स्तुतयः प्राप्यन्ते, तत्र 'मृदब्रवीत्' 'आपोऽब्रुवन्' 'श्रृणोत ग्रावाणः' 'ओषधेत्रायस्वैनं' 'स्वधिते मैनं हिंसीः' "घिषणासि पार्वतेयी प्रतित्वा पर्वती वेत्तु" इत्यादि "वैदिकवाक्येषु" अभिमानि "व्ययदेशस्तुविशेषानुगतिभ्याम्" इति वैयासिक सूत्रानुरोधेन तत्र तत्र काष्ठपाषाणादीष्वपि काचित् तदाभिमानी चेतना देवता एव संस्तुयते। एवं प्रकारेण सर्वत्र स्थावरजङ्गमपदार्थेषु देवास्तित्वं स्वीकृत्य बहुविधा देवता तत्र-तत्र संस्तुयन्ते।

देवतास्वरूप विमर्शः - तत्र वैदिक वाङ्मये पृथिव्यप्तोत्रोवाय्वाकाशादयः, सूर्यचन्द्रादयो ग्रहाश्च आजान देवताः कथ्यन्ते, एताः सृष्टिसमकाक्तमेव विधात्रा सृष्टि सञ्चाक्तनार्थमाविर्भाविताः, पुनश्च वेदोक्त कर्मानुष्ठानजन्य पुष्यप्रभावेण देवत्व मधिगताः काश्चन कर्मदेवताः भवन्ति । यप्या दिव्यपितरो मरुद्गणाश्चेत्यादयः। पुनश्चैता एव कर्म देवता नैजपुण्य प्रभाव प्राचुर्येण आज्ञानदेवतोपासना प्रसादेन च दिव्योन्नतिमद्यिगता आजानज देवता भवन्ति, यथा- इन्द्र कुबेरादयः । एवं प्रकारेण यज्ञेषु बहुविधाः देवता यद्यपि दृश्यन्ते, तथापि ताः सर्वाः एकस्यैवपरमात्मनो विभूतयो भवन्तीति सनिश्चयं वक्तुंशम्यते। यथाहि – निरुक्तशास्त्रस्य दैवतकाण्डे यास्काचार्येण निर्दिष्टं, यत् एक एव देवः परमेश्वरः दिव्यैश्वर्य सम्पन्नः स्वसामर्थ्यात् एककालावच्छेदेन नैकत्र नैकरुपेणात्मानमुपस्थापयितुं प्रभवति। तद्यथा –

[१] नि. ७/१

"एकैका देवता बहुमी रुपैरात्मानां प्रविभज्य बहुषु याशेषु युगपदङ्गतां गच्छतीतिपशैश्च न दृश्यते, अन्तर्धान क्रिया योगादिति"।[१]

एकेश्वर वादः – ऋग्वेदीय दशम मण्डके एक एव पुरुषाख्यो देवः महदैश्वर्यानन्तशक्ति सम्पन्नः विश्वरुपो विश्व व्यापकोविश्वेश्वरश्च समाम्नातः । इदं हि पुरुष सूक्तं स्वल्पशब्दान्तरेण प्रायः चतुर्ष्वपि वेदेषु प्राप्यते, तत्र – "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्" पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि "ततो विराद्रजायतविराजोऽधिपुरुषः" इत्यादिभिर्मन्त्रैरतीतानागतवर्तमानरूपं यावज्जगदस्ति, तत्सर्वं तस्यैव पुरुषाख्यस्य देवस्य एकः पादश्चतुर्थोऽश इत्यर्थः । अस्य देवस्य त्रिपाद् अंशत्रयं द्योतनात्मके स्वप्रकाशे अमृतरूपेण तिष्ठति। अयं हि देवो सहस्रशीर्षा सहसाक्षरुपतयाविश्वरुपः विश्वव्यापकश्च वर्तते। एतस्मादेव पुरुषात् हिरण्यगर्भाख्यो' विराट् पुरुष उत्पद्यते, स एव सर्वतः प्रथममुत्पन्नः सन् सर्वस्य जायमानस्य जगत उत्पादयितापालकः प्रजापतिश्च संजातः। स एक एव निरुच्यमानतया बहुधा स्तूयते, अनिर्वचनीयतया विश्वस्यास्यमूलकारणतया च एक एव स्तूयते । तद्यथा –

"हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्"[२]
"ततो देवाना समवर्ततासुरेकः"[३]
"यो देवेस्वधिदेव एक आसीत्"[४]
"यो देवानां नामधा एक एव"[५]

अपि च ऋग्वेदे हयेकत्र अग्निसूर्यादि देवानां कियती सङ्ख्याअस्तीति प्रश्नमुद्भाव्य समाधान मन्त्रेण देवानामेकैव सङ्ख्यामूलकारणरूपा वरीवर्ति इति सिद्धान्त रुपेण प्रतिष्ठाप्य बहुदेवतावादस्य एकेश्वरवादे एवान्तर्यानो निगदितः । तद्यथा –

प्रश्नः - **कत्यग्नयः कतिसूर्यासः कत्युषासः कत्युस्विदापः।**
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने किम्॥[६]
उत्तरम् - **एक एवाग्निर्बहुधा समिद्धः एक सूर्यो विश्वमनुप्रभूतः।**
एकैवोषाः सर्वमिदं विभात्येकं वा इदं विवभूव सर्वम्॥[७]

अनेन सुस्पष्टामिदं जायते, यत् एकैव परमात्मा नित्यः सर्वगतः- "अणोरणीयान् महतोमहीयान्"

---

[१] ब्र.सू.भा. १/३/२७
[२] ऋ. १०/१२१/१
[३] ऋ. १०/१२१/७
[४] ऋ. १०/१२१/८
[५] ऋ. १०/८२/३
[६] ऋ. १०/८८/१८
[७] ऋ. ८/५८/२

इति श्रुत्या सूक्ष्मातिसूक्षत्वात् अपुरुपः वृहत्तमत्वात् ब्रह्मरूपश्चाभिज्ञायते । तस्यैव एकस्वैव परमात्मनः सर्वे देवाः विभूतयो भवन्ति, तमेकमेव परमात्मानं क्रान्तप्रज्ञाः मनीषिणः स्तुतिवचोभिः बहुधा कल्पयति। परमार्थस्तु सर्वव्यापकः एक एव परमात्मा वेदेषु वहुत्र- 'तत्' पदेन व्यवहियते। तत्पदं सर्वनामभूतत्वात् पूर्वपरा मर्शकं बुद्धिस्थपरामर्शकं वा भवति, अतो वैदिकदर्शनपरम्परायां तदेकं परं तत्त्वं अग्नीन्द्र वायुसूर्यादि विविधरूपेण स्तूयते, वेदान्तदर्शने तदैवैकं तत्त्वं परं ब्रह्मपदेन व्यवहियते । एवं रीत्या वेदेषु एकेश्वर प्रति पादिकाः श्रुतयः संगच्छन्ते, तासांदिग्दर्शनमात्रमत्रोदाहियते । तद्यथा –

एकः॑ सु॒प॒र्णः स स॑मु॒द्रमावि॑वेश॒ स इ॒दं विश्वं॒ भुव॑नं॒ वि च॑ष्टे ।[1]
तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ॥[2]
सु॒प॒र्णं विप्राः॑ क॒वयो॒ वचो॑भि॒रेकं॒ सन्तं॑ बहु॒धा क॑ल्पयन्ति ।[3]
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥[4]

नासदीय सूक्ते तदवैकं तत्त्वं तत्पदेनाकूत्यते, स्वमहिम्ना तदेव एक मात्मानं बहुधा विश्वरूपतामादद्याति । तद्यथा –

आनी॑दवा॒तं स्व॒धया॒ तदेकं॑म् ।[5] **तप॑स॒स्तन्म॑हि॒ना जा॑यतैक॑म् ॥**[6]

तदेकस्मिन्नेव परमात्मनि समग्रमिदं चराचरं विश्वं नीडमेकमिव प्रतिभाति इत्याशय एव "यत्र विश्वं भवत्येकनीडम्" इति श्रुत्या निगद्यते । अतः मुण्डकोपनिषदि तदेव तात्पर्य शरीर निन्दया आत्मप्रशंसया चोपदिश्यते । तद्यथा –

स वेदैतत् परमं ब्रह्म धाम, यत्र विश्वं निहितं भाति शुभम् ।
उपासते पुरुषं ये हयकामार ते शुक्रमेतदतिवर्तत्तिधीराः ॥[7]

प्रो. राममूर्ति चतुर्वेदी
संस्कृत विभाग,
महात्मा गांधी, काशी विद्यापीठ, वाराणसी

---

[1] ऋ. १०/११४/४
[2] शु.य.जुः ३२/११
[3] ऋ. १०/११४/५
[4] ऋ. १०/११४/५
[5] ऋ. १०/१२९/२
[6] ऋ. १०/१२९/३
[7] मु. ३/२/११